तद्दत्त्वा पुराणैकं दानयम् । इति प्रायश्चित्त-तत्त्वम् ॥ (ब्रह्मपुराणेऽपि अस्य व्यवस्था यथा ।
नरस्तु चतुर्द्दश्यां पूर्णिमायाममावास्यायाञ्च पञ्चगव्यं हविष्यान्नं वा भक्षयेत् । यस्तु पौर्णमासीषु ब्रह्मकूर्च्चं कुर्य्यात् तस्य सर्व्वपापक्षयो भवेत् । यस्तु मासेन द्विःकुर्य्यात् स यथेष्टाङ्गतिमाप्नुयात् ॥)

ब्रह्मकोषी, स्त्री, (ब्रह्मणः कोषीव ।) अजमोदा । इति राजनिर्घण्टः ॥ (गुणादयोऽस्या अजमोदाशब्दे ज्ञेयाः ॥)

ब्रह्मगर्भा, स्त्री, (ब्रह्मैव गर्भो यस्याः ।) आदित्यभक्ता । इति राजनिर्घण्टः ॥

ब्रह्मगिरिः, पु, (ब्रह्मणो गिरिः पर्व्वतः ।) ब्रह्मशैलः । इति शब्दरत्नावली ॥ (नीलकूटाभिधेयकामाख्यानिलयस्य पूर्व्वभागे स्थितोऽयम् ।) यथा, कालिकापुराणे ८२ अध्याये ।
“ततस्तु नीलकूटाख्यं कामाख्यानिलयं परम् ।
तत्पूर्व्वभागे वसति ब्रह्मा ब्रह्मगिरिं पुनः ॥”

ब्रह्मघ्नी, स्त्री, गृहकन्या । इति राजनिर्घण्टः ॥ (ब्रह्माणं ब्राह्मणं हन्तीति । ब्रह्म + हन् + टक् । ततो ङीप् ।) ब्रह्मघातिनी च ॥

ब्रह्मचर्य्यं, क्ली, (ब्रह्मणे वेदार्थं चर्य्यं आचरणीयम् ।) आश्रमविशेषः । यथा, गारुडे ९४ अध्याये ।
“ब्रह्मचर्य्यस्थितो नैकमन्नमद्यादनापदि ।
ब्राह्मणः काममश्नीयात् श्राद्धे व्रतमपीड़यन् ॥
मधु मांसं तथाश्नीनमित्यादि परिवर्जयेत् ।
प्रतिवेदं ब्रह्मचर्य्यं द्वादशाब्दानि पञ्च वा ॥
ग्रहणान्तिकमित्येके केशान्तश्चैव षोड़श ॥”
(ब्रह्मचर्य्ये अष्टाङ्गमैथुनप्रतिषेधः । यदुक्तम् ।
“स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम् ।
संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च ॥
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः ।
विपरीतं ब्रह्मचर्य्यमेतदेवाष्टलक्षणम् ॥”
एतच्च स्त्रीपुरुषयोः साधारणम् । पुंसः स्त्रीस्मरणादि शून्यत्वम् । स्त्रियाश्च पुरुषस्मरणादिराहित्यम् अतएवाह मनुः । ५ । १६० ॥
“मृते भर्त्तरि साध्वी स्त्री ब्रह्मचर्य्ये व्यवस्थिता ।
स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः ॥”
“ब्रह्मचर्य्ये व्यवस्थिता अकृतपुरुषान्तरमैथुना ॥”
इति कुल्लूकभट्टः ॥
यमभेदः । यथा, पातञ्जले । २ । ३० ।
“अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहा यमाः ॥”
“ब्रह्मचर्य्यमुपस्थनियमः ।” वीर्य्यधारणञ्चा इति भाष्यम् ॥ एतत्तु कलियुगे नास्ति । यथाह महानिर्व्वाणतन्त्रे ।
“ब्रह्मचर्य्याश्रमो नास्ति वानप्रस्थोऽपि न प्रिये ।
गार्हस्थो भैक्षुकश्चैव आश्रमौ द्वौ कलौ युगे ॥”)

ब्रह्मचारणी, स्त्री, (ब्रह्मणा वेदेन चारयति आचरतीति । ब्रह्म + चर + स्वार्थे णिच् + कर्त्तरि ल्यु । ङीप्) भार्गी । इति रत्नमाला ॥

ब्रह्मचारिणी, स्त्री, (ब्रह्मणि वेदे चरतीति, ब्रह्म + चर् + णिनिः । स्त्रियां ङीप् ।) दुर्गा । यथा, देवीपुराणे ४५ अध्याये ।
“वेदेषु चरते यस्मात्तेन सा ब्रह्मचारिणी ॥”
करुणीवृक्षः । इति राजनिर्घण्टः ॥ ब्राह्मीशाकः । इति रत्नमाला ॥ ब्रह्मचर्य्यव्रतधारिणी । यथा,
“आसीतामरणात् क्षान्ता नियता ब्रह्मचारिणी ।
यो धर्म्म एकपत्नीनां काङ्क्षन्ती तमनुत्तमम् ॥”
इति मनुः । ५ । १५८ ॥

ब्रह्मचारी, [न्] पुं, (ब्रह्म ज्ञानं तपो वा आचरति अर्जयत्यवश्यम् । ब्रह्म + चर + आवश्यके णिनिः ।) प्रथमाश्रमी । इति भरतः ॥ उपनयनानन्तरं नियमं कृत्वा गुरोः सन्निधौ स्थित्वा साङ्गवेदाध्ययनं करोति यः । स द्विविधः । उपकुर्व्वाणः नैष्ठिकश्च । तस्य नियमा यथा,—
“यद्यस्य विहितं चर्म्म यत् सूत्रं या च मेखला ।
यो दण्डो यच्च वसनं तत्तदस्य व्रतेष्वपि ॥
सेवते मांस्तु नियमान् ब्रह्मचारी गुरौ वसन् ।
संनियम्येन्द्रियग्रामं तपोवृद्ध्यर्थमात्मनः ॥
नित्यं स्नात्वा शुचिः कुर्य्याद्देवर्षिपितृतर्पणम् ।
देवताभ्यर्च्चनञ्चैव समिदाधानमेव च ॥
वर्जयेन्मधु मांसञ्च गन्धं माल्यं रसान् स्त्रियः ।
शुक्तानि यानि सर्व्वाणि प्राणिनाञ्चैव हिंसनम् ॥
अभ्यङ्गमञ्जनञ्चाक्ष्णोरुपानच्छत्रधारणम् ।
कामं क्रोधञ्च लोभञ्च नर्त्तनं गीतवादनम् ॥
द्यूतञ्च जनवादञ्च परिवादं तथानृतम् ।
स्त्रीणाञ्च प्रेक्षणालम्भमुपघातं परस्य च ॥
एकः शयीत सर्व्वत्र न रेतः स्कन्दयेत् क्वचित् ।
कामाद्धि स्कन्दयन्रेतो हिनस्ति व्रतमात्मनः ॥
स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः ।
स्नात्वार्कमर्च्चयित्वा त्रिः पुनर्मामित्यृचं जपेत् ॥
उदकुम्भं सुमनसो गोशकृन्मृत्तिकाकुशान् ।
आहरेद्यावदर्थानि भैक्षञ्चाहरहश्चरेत् ॥
वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्म्मसु ।
ब्रह्मचार्य्याहरेद्भैक्षं गृहेभ्यः प्रयतोऽन्वहम् ॥
गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु ।
अलाभे त्वन्यगेहानां पूर्व्वं पूर्व्वं विवर्ज्जयेत् ॥
सर्व्वं वापि चरेद्ग्रामं पूर्व्वोक्तानामसम्भवे ।
नियम्य प्रयतो वाचमभिशस्तांस्तु वर्ज्जयेत् ॥
दूरादाहृत्य समिधः सन्निदध्याद्विहायसि ।
सायं प्रातश्च जुहुयात् ताभिरग्निमतन्द्रितः ॥
अकृत्वा भैक्षचरणमसमिध्य च पावकम् ।
अनातुरः सप्तरात्रमवकीर्णिव्रतञ्चरेत् ॥
भैक्षेण वर्त्तयेन्नित्यं नैकान्नादी भवेद्व्रती ।
भैक्षेण व्रतिनो वृत्तिरुपवाससमा स्मृता ॥
व्रतवद्देवदैवत्ये पित्र्ये कर्म्मण्यथर्षिवत् ।
काममभ्यर्थितोऽश्नीयाद्व्रतमस्य न लुप्यते ॥
ब्राह्मणस्यैव कर्म्मैतदुपदिष्टं मनीषिभिः ।
राजन्यवैश्ययोस्त्वेवं नैतत् कर्म्म विधीयते ॥
चोदितो गुरुणा नित्यमप्रचोदित एव वा ।
कुर्य्यादध्ययने यत्नमाचार्य्यस्य हितेषु च ॥
शरीरञ्चैव वाचञ्च बुद्धीन्द्रियमनांसि च ।
नियम्य प्राञ्जलिस्तिष्ठेद्वीक्षमाणो गुरोर्मुखम् ॥
नित्यमुद्धृतपाणिः स्यात् साध्वाचारः सुसंयतः ।
आस्यतामिति चोक्तः सन्नासीताभिमुखं गुरोः ॥
हीनान्नवस्त्रवेशः स्यात् सर्व्वदा गुरुसन्निधौ ।
उत्तिष्ठेत् प्रथमञ्चास्य चरमञ्चैव संविशेत् ॥
प्रतिश्रवणसम्भाषे शयानो न समाचरेत् ।
नासीनो न च भुञ्जानो न तिष्ठन्न पराङ्मुखः ॥
आसीनस्य स्थितः कुर्य्यादभिगच्छंस्तु तिष्ठतः ।
प्रत्युद्गम्य त्वाव्रजतः पश्चाद्धावंस्तु धावतः ॥
पराङ्मुखस्याभिमुखो दूरस्थस्येत्य चान्तिकम् ।
प्रणम्य तु शयानस्य निदेशे चैव तिष्ठतः ॥
नीचं शय्यासनञ्चास्य सर्व्वदा गुरुसन्निधौ ।
गुरोस्तु चक्षुर्व्विषये न यथेष्टासनो भवेत ॥
नोदाहरेदस्य नाम परोक्षमपि केवलम् ।
न चैवास्यानुकुर्व्वीत गतिभाषितचेष्टितम् ॥
गुरोर्यत्र परीवादो निन्दा वापि प्रवर्त्तते ।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः ॥
परीवादात् खरो भवति श्वा वै भवति निन्दकः ।
परिभोक्ता कृमिर्भवति कीटो भवति मत्सरी ॥
दूरस्थो नार्च्चयेदेनं न क्रुद्धो नान्तिके स्त्रियाः ।
यानासनस्थश्चैवैनमवरुह्याभिवादयेत् ॥
प्रतिवातेऽनुवाते च नासीत गुरुणा सह ।
असंश्रवे चैव गुरोर्न किञ्चिदपि कीर्त्तयेत् ॥
गोऽश्वोष्ट्रयानप्रासादप्रस्तरेषु कटेषु च ।
आसीत गुरुणा सार्द्धं शिलाफलकनौषु च ॥
गुरोर्गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेत् ।
न चानिसृष्टो गुरुणा स्वान् गुरूनभिवादयेत् ॥
विद्यागुरुष्वेतदेव नित्या वृत्तिः स्वयोनिषु ।
प्रतिषेधत्सु चाधर्म्मान् हितञ्चोपदिशत्स्वपि ॥
श्रेयःसु गुरुवद्वृत्तिं नित्यमेव समाचरेत् ।
गुरुपुत्त्रेषु चार्य्येषु गुरोश्चैव स्वबन्धुषु ॥
बालः समानजन्मा वा शिष्यो वा यज्ञकर्म्मणि ।
अध्यापयन् गुरुसुतो गुरुवन्मानमर्हति ॥
उत्सादनञ्च गात्राणां स्नापनोच्छिष्टभोजने ।
न कुर्य्याद्गुरुपुत्त्रस्य पादयोश्चावनेजनम् ॥
गुरुवत् प्रतिपूज्याः स्युः सवर्णा गुरुयोषितः ।
असवर्णास्तु संपूज्याः प्रत्युत्थानाभिवादनैः ॥
अभ्यञ्जनं स्नापनञ्च गात्रोत्सादनमेव च ।
गुरुपत्न्या न कार्य्याणि केशानाञ्च प्रसाधनम् ॥
गुरुपत्नी तु युवतिर्नाभिवाद्येह पादयोः ।
पूर्णविंशतिवर्षेण गुणदोषौ विजानता ॥
स्वभाव एष नारीणां नराणामिह दूषणम् ।
अतोऽर्थान्न प्रमाद्यन्ति प्रमदासु विपश्चितः ॥
अविद्वांसमलं लोके विद्वांसमपि वा पुनः ।
प्रमदा ह्युत्पथं नेतुं कामक्रोधवशानुगम् ॥
मात्रा स्वस्रा दुहित्रा वा न विविक्तासनो भवेत् ।
बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥
कामन्तु गुरुपत्नीनां युवतीनां युवा भुवि ।
विधिवद्वन्दनं कुर्य्यादसावहमितिब्रुवन् ॥
विप्रोष्य पादग्रहणमन्वहञ्चाभिवादनम् ।
गुरुदारेषु कुर्व्वीत सतां धर्म्ममनुस्मरन् ॥
यथा खनन् खनित्रेण नरो वार्य्यधिगच्छति ।
तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति ॥